# २. प्रातःस्मरणम्

**(शुभ कार्यारंभी म्हटल्यास कार्य हमखास यशस्वी होते)**

उत्तिष्ठोत्तिष्ठ हेरंब उत्तिष्ठ ब्रह्मणस्पते। सर्वदा सर्वतःसर्वविघ्नान्मां पाहि विघ्नप ।।१।। आयुरारोग्यमैश्वर्यं मां प्रदाय स्वभक्तिमत् । स्वेक्षणाशक्तीराद्या ते दक्षिणा पातु मां सदा ।।२।। प्रातःस्मरामि गणनाथमनाथबंधुम् । सिंदूरपूरपरिशोभितगंडयुग्मम्।। उद्दंडविघ्न परिखंडनचंडदण्डम। आखंडलादि-सुरनायकवृंदवंद्यम्।।३।। प्रातर्नमामि चतुराननवंद्यमानम्। इच्छानुकूलमखिंल च वरं ददानम्। तं तुंदिलं द्विरसनप्रिय यज्ञसूत्रम् । पुत्रं विलासचतुरं शिवयोःशिवाय ।।४।। प्रातर्भजाम्यभयदं खलु भक्तशोकदावानलं गणविभुं वरकुंजरास्यम्। अज्ञानकाननविनाशनहव्यवाहम् । उत्साहवर्धनमहं सुतमीश्वरस्य।।५।। कराग्रे सत्प्रभा बुध्दीः कमला करमध्यगा । करमूले मयूरेशः प्रभाते कर-दर्शनम् ।।६।। ज्ञानरुपवराहस्य पत्नि कर्मस्वरुपिणि । सर्वाधारे धरे नौमि पादस्पर्श क्षमस्व ३ मे ।।७।। तारश्रीनर्मदादूर्वा-शमीमंदारमोदित । द्विरदास्व मयूरेश दुःस्वप्नहर पाहि माम् ।।८।। वक्रतुंड महाकाय सूर्यकोटीसमप्रभ । निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ।।९।। गणनाथसरस्वतीरविशुक्रबृहस्पतीन्। पञ्चैतानि स्मरेन्नित्यं वेदवाणीप्रवृत्तये।।१०।। विनायंक गुरं ब्रह्माविष्णुमहेश्वरानः।सरस्वतीं प्रणौम्यादौ सर्वकार्यार्थसिध्दये ।।११।। अभीप्सितार्थसिध्दयर्थ पूजितो यः सुरासुरैः सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ।।१२।। अगजाननपद्मार्कं गजाननमहर्निशं । अनेकदं तं भक्तानाम-एकदंतमुपास्महे ।।१३।। नमस्तस्मै गणेशाय यत्कंठःपुष्करायते। यदाभोगधनध्वान्तो नीलकण्ठस्य तांडवे।।१४।। कार्यं मे सिध्दीमायातु प्रसन्ने त्वयि धातरि ।। विघ्नानि नाशमायांतु सर्वाणि सुरनायक ।।१५।। नमस्ते विघ्नसंहर्त्रे नमस्ते ईप्सितप्रद । नमस्ते देवदेवेश नमस्ते गणनायक ।।१६।। इति प्रातःस्मरणम्।